संस्कृत-वार्ताः

**दिनाङ्कः- 31.10.2025** **सायम् - 06:20**

**मुख्यवार्ताः**

- **प्रधानमन्त्री नरेन्द्रमोदी अद्य दिल्ल्याम् अन्ताराष्ट्रिय-आर्य-महासम्मेलनं सम्बोधितवान्। सः अवदत् यत् आर्य-समाजः एतादृशं सङ्घठनम् यत् निर्भीकतया भारतीयतायाः विषयं प्रकाशयति।**
- **प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातस्य एकता-नगरे आयोजिते राष्ट्रीयैकता-दिवस-समारोहे विशालजनसमूहं सम्बोधितवान्।**
- **अद्य भारत-अमेरिका-देशौ अग्रिमदशवर्षेभ्यः रक्षाक्षेत्रे सहकारार्थं प्रारूपसमन्वये हस्ताक्षराणि कृतवन्तौ।**
- **अन्ताराष्ट्रिय-विंशति- प्रतिविंशतिः - क्रिकेट-क्रीडायां मेल्बोर्न-क्रिकेट्-क्रीडाङ्गणे पञ्च-क्रीडात्मक-श्रृङ्खलायाः द्वितीये द्वन्द्वे अमेरिका-दलेन भारतदलं चतुर्भिः स्तोभैः पराजितम्।**

**प्रधानमन्त्री-आर्यसम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रोक्तवान् यत् लाला-लाजपत-राय-सदृशाः बहवः स्वतन्त्रता-सेनानिनः आर्य-समाजेन प्रेरणां सम्प्राप्य स्वतन्त्रता-आन्दोलनाय आत्मानं न्ययोजयन् । दिल्ल्याम् अन्ताराष्ट्रिय-आर्य-महासम्मेलनं सम्बोधयन्, श्रीमोदी अवदत् यत् महदिदं दौर्भाग्यं यत् बहुवर्षाणि यावत् आर्य-समाजः उचितं सम्मानं नैव प्राप्तवान् । सः अवदत् यत् आर्य-समाजः एतादृशं सङ्घठनम् यत् निर्भीकतया भारतीयतायाः विषयं प्रकाशयति। अत्रावसरे सः स्वामी-दयानन्द-सरस्वतीमपि श्रद्धाञ्जलिं अर्पितवान्।

**प्रधानमन्त्री-गुजरातः**

प्रधानमन्त्री नरेन्द्रमोदी नागरिकान् एकीभूय विकसित-भारतस्य स्वप्नं पूरयितुम् आह्वानम् अकरोत् । सरदार-वल्लभभाई-पटेलस्य पञ्चाशदधिक-शततमे जयन्त्यवसरे गुजरातस्य एकता-नगरे आयोजिते राष्ट्रीयैकता-दिवस-समारोहे विशालजनसमूहं सम्बोधयन्, प्रधानमन्त्री श्रीमोदी कोट्यधिकजनैः गृहीते एकतायाः शपथवचने राष्ट्रव्यापिनीं सहभागितां प्रकाशितवान् सहैव राष्ट्रीय-एकतां सुदृढां कर्तुं सामूहिक-संकल्पञ्च समर्थितवान् । तेन सबलं प्रोक्तं यत् प्रत्येकेन नागरिकेण राष्ट्र-विरोधितत्वानां निराकरणं कर्तव्यम् । सः अवदत् यत् स्वतन्त्रतानन्तरं, सरदार-पटेलः 'एकं भारतं, श्रेष्ठं भारतम्' इत्याख्येन दृष्टिकोणेन पञ्चाशदधिक-पञ्चशताधिक-क्षेत्राणि एकीकृत्य असाध्यकार्यं समपादयत्। प्रधानमन्त्रिणा प्रोक्तं यत् चतुर्दशाधिक-द्विसहस्रादारभ्य सर्वकारेण नक्सलवादस्य तथा माओवादी-आतङ्कवादस्य चोपरि कश्चन निर्णायकप्रहारः कृतः। तेनोदीरितं यत् चतुर्दशाधिक-द्विसहस्रात् पूर्वं प्रायः शताधिकजनपदाः माओवादी-गतिविधिभिः प्रभाविताः आसन्, किन्तु अद्य एषा संख्या केवलम् अपचीय एकादशं यावदेव वर्तते। सः प्रोक्तवान् यत् साम्प्रतं त्रीणि मण्डलानि एव नक्सलवादेन गम्भीररूपेण प्रभावितानि सन्ति। भारतस्य समृद्धाध्यात्मिक-सांस्कृतिक-न्यासं प्रकाशयन्, श्रीमोदी अवदत् यत् द्वादश-ज्योतिर्लिङ्गानि, शक्तिपीठाः, चत्वारि-धामानि च राष्ट्रस्य जीवनशक्तेः प्रतीकानि सन्ति, एतानि तावत् विभिन्नानां क्षेत्राणां तथा धर्माणां च जनान् एकस्मिन् सूत्रे ग्रथ्नन्ति । सः देशस्य भाषात्मक-विविधतायाः प्रशंसाम् अकरोत् तथैव एषा भारतस्य बृहत्तमासु शक्तिषु अन्यतमा इत्यपि अवोचत्।

**राष्ट्रपति-सरदार पटेलः**

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य प्रातः सरदार-वल्लभभाई-पटेलस्य पञ्चाशदधिक-शततमे जयन्त्यवसरे नवदिल्ल्याः पटेल-चौक इत्याख्ये स्थाने स्थितायाम् तस्य प्रतिमायां पुष्पाञ्जलिं समर्पितवती। अत्रावसरे सा राष्ट्रियैकता-दिवसावसरे देशवासिभ्यः अपि शुभकामनां प्रायच्छत् ।

**शाह-एकतायै धावनम्**

गृहमन्त्री अमित शाहः अवदत् यत् सरदार-पटेलः स्वतन्त्रतानन्तरं देशम् एकीकर्तुं अद्यतन-भारतस्य निर्माणार्थं अखण्डराष्ट्रस्य प्रकल्पनायाञ्च अप्रतिमं योगदानं निर्व्यूढवान्। राष्ट्रियैकता-दिवसावसरे दिल्ल्याः मेजर-ध्यानचन्द-राष्ट्रिय-क्रीडाङ्गणात् 'रन फॉर यूनिटी' एकतायै धावनम्' इत्येतस्मै कार्यक्रमाय हरित-ध्वजं प्रदर्शयन् तेन एतत् प्रोदीरितम्।

**एकता-दिवसः**

राष्ट्रिय-एकता-दिवसस्य अवसरे अद्य प्रातःकाले मिजोरम-राज्ये तथा देशस्य अन्येषु भागेषु च रन फॉर यूनिटी इत्यसौ कार्यक्रमः आयोजितः ।आइज़ोल-नगरे यत्र प्रायः चतुर्शतं प्रतिभागिनः भागम् अगृह्णन्, तत्र मिजोरम्-राज्यस्य सर्वेषु जनपदेषु युगपत् एतादृश्यः स्पर्धाः आयोजिताः। रन फ़ार यूनिटी इत्यस्य आइज़ोल-चरणस्य आयोजनं भारतीय-क्रीडा-प्राधिकरणेन क्रीडा-युव-सेवा-विभागस्य सहयोगेन कृतम् । राष्ट्रिय-एकता-दिवसः, सरदार वल्लभ भाई पटेलस्य पञ्चाशत्यधिक-एकशततमे जयन्त्यवसरे आचर्यते।

**रक्षा-सन्धिः**

अद्य भारत-अमेरिका-देशौ अग्रिमदशवर्षेभ्यः रक्षाक्षेत्रे सहकारार्थं प्रारूपसमन्वये हस्ताक्षराणि कृतवन्तौ। रक्षामन्त्री राजनाथसिंहः सामाजिक-सञ्जालीय-सन्देशे अवदत् यत् सः मलेशिया-देशस्य क्वालालम्पुर-नगरे अमेरिकादेशस्य युद्ध-प्रमुखेन पीट हेगसेथ इत्यनेन सह मिलितवान् । अस्मिन् सम्मेलने पक्षद्वयेनापि रक्षा-संरचनायां हस्ताक्षरं कृतम्, येन उभयपक्षयोः प्रबल-रक्षा-सहभागितायां नवयुगस्य आरम्भः भविष्यति। सः इतोऽपि अवदत् यत् एषा रक्षा-प्रणाली भारत-अमेरिका-रक्षा-सम्बन्धस्य सम्पूर्णक्षेत्रस्य कृते नीति-निर्देशनं प्रदास्यति।

**बिहार-संकल्पपत्रम्**

इति राष्ट्रिय-जनतांत्रिक-सङ्घटनेन (एन्. डी. ए.) अद्य पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य बिहारविधानसभानिर्वाचनाय संयुक्तसङ्कल्पपत्रम् घोषितम्। बिहारस्य मुख्यमन्त्रिणः नितीशकुमारस्य, भाजपा-अध्यक्षस्य जे. पी. नड्डायाः, भाजपेति-दलस्य बिहार-निर्वाचन-प्रभारिणः धर्मेन्द्र-प्रधानस्य, अन्येषां एन्. डी. ए-नेतृणां च उपस्थितौ सङ्कल्पपत्रस्य विमोचनं अभवत् । भाजपेति-दलस्य अध्यक्षः दिलीप जायसवालः उक्तवान् यत् एन्. डी. ए-पक्षस्य घोषणा-पत्रस्य अर्थः अस्ति प्रधानमन्त्रिणः नरेन्द्र-मोदिनः प्रत्याभूतिः, बिहारस्य मुख्यमन्त्रिणः नितीश-कुमारस्य विश्वासः च। एन्. डी. ए. इत्यस्य घोषणापत्रे, *के. जी.* तः *पी. जी.* पर्यन्तं निःशुल्कशिक्षां प्रदीयते इति घोषितम् अस्ति। एन्. डी. ए. पक्षस्य घोषणापत्रे बिहार-गतिशक्ति-योजनायाः अन्तर्गतं सप्त नूतनानां द्रुतमार्गाणां निर्माणस्य उल्लेखः अपि अस्ति। कृषकाणां आयसम्वर्धनाय एन्. डी. ए. इत्यनेन कृषि-आधारिकसंरचनायाम् एकलक्षकोटि-रूप्यकाणां निवेशस्य प्रतिज्ञा कृता अस्ति। अपरपक्षे, काङ्ग्रेस्-दलेण एन्. डी. ए-घोषणा-पत्रम् "मिथ्या-वचनानाम् सङ्कलनं" इति घोषितम्। अत्रान्तरे, राज्ये प्रतिकूल-ऋतोः कारणात् अद्य विधानसभानिर्वाचनस्य प्रचारः प्रभावितः।

**रक्षामन्त्री-राजनाथसिंहः**

रक्षामंत्री राजनाथसिंहः अधोरेखितवान् यत् भारत-आसियान्-देशयोः सम्बन्धस्य केन्द्रबिन्दुः सामुद्रिक-सुरक्षा अस्ति इति। सः आसियान्-सदस्य-देशानां प्रशंसाम् अकरोत् यतः ते आसियान्-भारत-सामुद्रिक-अभ्यासस्य द्वितीये संस्करणे सहमतिं प्रकटितवन्तः। अद्य क्वालालम्पुर-नगरे आसियान्-भारत-रक्षामन्त्रिमण्डले अनौपचारिकसम्मेलने उद्घाटनावसरे रक्षामन्त्रिणा उक्तं यत् समुद्रमार्गाणां सुरक्षा देशस्य सर्वोच्चप्राथमिकता अस्ति।

**ऋतुविभागः**

भारतीय-ऋतु-विभागेन अद्य उप-हिमालयीय-पश्चिम-बङ्गालस्य, बिहारस्य, सिक्किमस्य, अरुणाचल-प्रदेशस्य, गुजरातस्य च केषुचित् भागेषु अतिवृष्टेः पूर्वानुमानं कृतम् अस्ति। विभागेन तावत् पूर्वोत्तर-भारते, उत्तराखण्डस्य केषुचित् प्रदेशेषु, बिहारस्य उत्तर-मण्डलेषु, पश्चिम-बङ्गालस्य, गुजरातस्य, मध्य-प्रदेशस्य, कोङ्कण-गोवा-प्रदेशयोः, कर्नाटकस्य, केरलस्य, लक्षद्वीपस्य छत्तीसगढस्य च केषुचित् भागेषु लघु-मध्यम-वृष्टेः सम्भावना व्यक्तिकृता। सहैव अद्य पश्चिम-बङ्गालस्य गङ्गा-प्रदेशे, गुजरातराज्यस्य च केषुचित् स्थानेषु मेघगर्जनं समेत्य झञ्झावातस्य पूर्वानुमानमपि प्रख्यापितम् ।

**क्रिकेटक्रीडा**

अन्ताराष्ट्रिय-विंशति- प्रतिविंशतिः - क्रिकेट-क्रीडायां मेल्बोर्न-क्रिकेट्-क्रीडाङ्गणे पञ्च-क्रीडात्मक-श्रृङ्खलायाः द्वितीये द्वन्द्वे अमेरिका-दलेन भारतदलं चतुर्भिः स्तोभैः पराजितम्।

**।। इति वार्ताः ।।**